दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-217 | 1 | जून 05 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः ज्येष्ठशुक्लदशमी
ज्येष्ठ 22 प्रविष्टांशः मङ्गलमयः भवेत्

2 सर्वकारीचिकित्सालयेषु पंजीकरणं कर्तुं रोगिभ्यः १० रुप्यकाणि स्वीकृतानि भविष्यन्ति अधिसूचना निर्गता

3 HP Education Department: हिमाचलप्रदेशस्य विद्यालयेषु महाविद्यालयेषु च 5 जूनतः शिक्षकाणां स्थानान्तरणे प्रतिबन्धः

4 विश्वपर्यावरणदिवसः पर्यावरणसंरक्षणम् अस्माकम् उत्तरदायित्वम्

## सुभाषितम्
**नात्युच्चशिखरो मेरु-**
**र्नातिनीचं रसातलम्।**
**व्यवसायद्वितीयानां**
**नात्यपारो महोदधिः।**

अर्थात्- जो मनुष्य लक्ष्यसिद्ध, आलस्य विहीन व परम पुरुषार्थी होता है (अपने स्वयं के प्रयत्नों पर निर्भर होता है), उसके लिए पर्वत की चोटी उंची नही, पृथ्वी का तल नीचा नहीं और महासागर भी अनुल्लंघ्य नहीं अर्थात् उसके लिये कुछ भी असम्भव नहीं है।

## पञ्चदिवसीयहज-तीर्थयात्रा आरब्धा, भारतं समेत्य विश्वस्य अष्टादशलक्षाधिकाः तीर्थयात्रिणः सऊदी अरबदेशस्य मीनानगरे सम्प्राप्स्यन्ति



हिमसंस्कृतवार्ताः - आरब्धायां वार्षिकपञ्चदिवसीयहजयात्रायां भारतं समेत्य विश्वस्य अष्टादशलक्षाधिकाः तीर्थयात्रिणः सऊदी अरबदेशस्य मीनानगरे सम्प्राप्स्यन्ति। तीर्थयात्रिणः पवित्र-मक्का-नगरात् मीना-तंबूनगरे समागन्तुं यात्रां आरब्धवन्तः । तत्र रात्रौ विश्रामं कृत्वा, अराफात-उद्यानं प्रति गमिष्यन्ति, यत्र ते हजेत्यस्य दिवसस्य मुख्यसंस्कारं, नमाज-प्रार्थनापाठं करिष्यन्ति। पूर्वं अल्पसंख्यकमन्त्रालयेन सामाजिकमाध्यमेषु एकस्मिन् सन्देशे उक्तं यत् प्रत्येकेभ्यः भारतीयहजयात्रिभ्यः सरल-गरिमापूर्णयात्रां सुनिश्चेतुं मन्त्रालयः सर्वविध-प्रयासरतोऽस्ति ।

## ली-जे-म्याङ्गः दक्षिणकोरियादेशस्य एकविंशतितम-राष्ट्रपतित्वेन शपथग्रहणं कृतम्



हिमसंस्कृतवार्ताः - लिबरल-डेमोक्रेटिक पार्टीति दलस्य नेत्रा ली-जे-म्याङ्ग इत्यनेन दक्षिणकोरियादेशस्य एकविंशतितम-राष्ट्रपतित्वेन शपथग्रहणं कृतम्। तस्य कार्यकालं पञ्चवर्षाणि यावत् भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी कोरियागणराज्यस्य राष्ट्रपतित्वेन निर्वाचितस्य ली- जे-म्याङ्ग इत्यस्य अभिनन्दनं कृतवान्। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे प्रधानमन्त्रिणा उक्तं यत् भारत-कोरियादेशौ विशेष-रणनीतिक-सहभागिताम् अग्रे विस्तारयितुम् एकीभूय कार्यं कर्तुञ्च उत्सुकौ स्तः।

## विपक्षीदलानाम् अनुरोधेन सिन्दूराभियानमधिकृत्य चर्चायै संसदः विशिष्टसत्रम् आहूतम्



**हिमसंस्कृतवार्ताः** - प्रशासनेन आगामिमासस्य एकविंशतिः दिनाङ्कात् आरभ्यमाणस्य संसदः प्रावृट्सत्रस्य सूचना प्रसारिता। एतत् विपक्षीदलानां अनुरोधेन सिन्दूराभियानमधिकृत्य चर्चायै संसदः विशिष्टसत्रं आहूतमस्ति । संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत् अस्य सत्रस्य समापनम् अगस्तमासस्य द्वादशदिनाङ्के भविष्यति। पहलगामे जाते आतङ्क्याक्रमणे पञ्चविंशतिः भारतीयाः एकः नेपालीनागरिकः च मृतः । तदनन्तरं भारतेन आरब्धस्य सिन्दूराभियानस्य अनन्तरं एतत् प्रथमं संसद्सत्रं भविष्यति। भारतीयसशस्त्रसेनायाः प्रतिकारात्मककार्याणि पाकिस्तानेन अधिकृत-जम्मू-कश्मीरे च आतङ्क-स्थलेषु प्रहारं कृत्वा शततोप्यधिकाः आतङ्कवादिनः मारिताः आसन् । पहलगामातङ्क्याक्रमणस्य अनन्तरं विभिन्नराजनैतिकदलानां नेतृणां उपस्थितौ सर्वदलीयोपवेशनम् अपि सर्वकारेण आयोजितम् आसीत् ।

## असमराज्ये जलाप्लावेन एकविंशति-जनपदेषु त्रिंशत्सहस्राधिक-षड्लक्षाधिकाः जनाः प्रभाविताः

हिमसंस्कृतवार्ताः - असमराज्ये जलाप्लावेन एकविंशति-जनपदेषु त्रिंशत्सहस्राधिक-षड्लक्षाधिकाः जनाः प्रभाविताः। सहैव राज्ये मृतकानां सङ्ख्या समेध्य द्वादशमितं समभवत्। प्राप्तवार्तानुसारेण विगतेषु चतुर्विंशतिहोरासु राज्ये जलाप्लावेन षड्जनाः मृत्युमुपगताः। सहैव राज्ये पञ्चदशशताधिकाः ग्रामाः जलाप्लावेन प्रभाविताः। एवमेव सप्तशताधिक-चतुर्दशसहस्रपरिमितं सस्यक्षेत्रं क्षतिग्रस्तमभवत् । राज्यसर्वकारेण रक्षाप्रवर्तनार्थं एस-डी-आर-एफ-दलानि एन-डी-आर-एफ-दलानि च नियोजितानि सन्ति। असमराज्यस्य आपत्प्रबन्धन-प्राधिकरणानुसारं त्रयोविंशत्यधिक-द्विशतशिविरेषु चत्वारिंशत्सहस्रजनाः स्थितास्सन्ति ।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## भारत-ऑस्ट्रेलिया-देशयोः मध्ये व्यापक-सामरिकसहभागिता वर्धयितुं मिलितौ प्रधानमन्त्री नरेन्द्रमोदी तथा आस्ट्रेलियादेशस्य उपप्रधानमन्त्री



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी तथा आस्ट्रेलियादेशस्य उपप्रधानमन्त्री रक्षामन्त्री च रिचर्ड मार्लेसः इत्येतौ भारत-ऑस्ट्रेलिया-देशयोः मध्ये व्यापक-सामरिकसहभागिताम् इतोप्यधिकं सुदृढयितुं विचाराणां आदान-प्रदानं कृतवन्तौ। आस्ट्रेलियादेशस्य उपप्रधानमन्त्री नवदेहल्यां प्रधानमन्त्रिणं मोदिनं मिलित्वा सीमपार आतङ्कवादविरुद्धे भारतस्य युद्धे स्वदेशस्य समर्थनं प्रदत्तवान्। उभौ नेतारौ रक्षा-औद्योगिकसहकार्य, आपूर्तिशृङ्खलाः, महत्त्वपूर्णाः खनिजाः, नवीनाः उद्यमानाः च प्रौद्योगिकीः इत्यादिषु प्रमुखक्षेत्रेषु सहकार्यं वर्धयितुं महत्त्वं रेखांकितवन्तौ। तौ पुनः पुष्टि कृतवन्तौ यत् स्थिरस्य, सुरक्षितस्य, समृद्धस्य च हिंद-प्रशांतयोः दृष्टिकोणयोः द्विपक्षीयसहकार्याणां मार्गदर्शनं निरन्तरं क्रियते। सद्यः एव सङ्घीयनिर्वाचने आस्ट्रेलियादेशस्य लेबर पार्टीति दलस्य ऐतिहासिकविजयाय प्रधानमन्त्री मोदी तस्य अभिनन्दनं कृतवान्। अस्य वर्षस्यान्ते भारते आयोक्ष्यमाणाय वार्षिकशिखरसम्मेलनाय सः आस्ट्रेलियादेशस्य प्रधानमन्त्रिणं एन्थोनी अल्बानी इत्यस्मै आमन्त्रितवान्। एतदतिरिक्तं रक्षामन्त्री राजनाथसिंहः सहैव ऑस्ट्रेलियायाः उप-प्रधानमन्त्री रक्षामन्त्री रिचर्ड-मार्लेसः इत्यनयोः मध्ये नवदेहल्याम् उपवेशनं समभवत्। उपवेशनावधौ ऑस्ट्रेलियादेशस्य उप-प्रधानमन्त्रिणा आतङ्कवादं विरुध्य भारतेन सह ऐक्यं प्रकटितवान्। तेन सबलं प्रोक्तं यत् भारत-ऑस्ट्रेलियादेशौ रक्षा-समुद्रीसुरक्षाप्रकरणेषु च परस्परसहयोगिनौ स्तः। रक्षामन्त्रिणा राजनाथसिंहेन स्वीयः ऑस्ट्रेलिया-समकक्षीयः देशस्य समक्षे पश्चिमक्षेत्रेषु समुत्पन्नसङ्कटानां विषये संसूचितः। इतः पूर्वं श्रीमार्लेसः मानेकशाँ-केन्द्रे गार्ड-ऑफ-ऑनर-पुरस्कारेण सम्मानितः। ऑस्ट्रेलियादेशस्य मन्त्रिणा नवदेहल्यां राष्ट्रिय-युद्ध-स्मारके पुष्पाञ्जलिरपि समर्पितः।

# भारतेन एशियाई-विकास-वित्तालयाः पाकिस्तानाय

## वित्तीयसहायताप्रदानेन संसाधनानां दुरुपयोगः भविष्यतीति सञ्चेतिताः




हिमसंस्कृतवार्ताः - भारतेन एशियाई-विकास-वित्तालयाः पाकिस्तानाय वित्तीयसहायताप्रदानेन संसाधनानां दुरुपयोगः भविष्यतीति सञ्चेतिताः। सूत्रानुसारं भारतेन एडीबी-संसाधनानां सम्भावित-दुरुपयोगविषये गहनचिन्ता प्रकटिता । भारतेन एतत् प्रकाशितं यत् सकलान्तरिकोत्पादत्वेन पाकिस्तानस्य करसंग्रहः अष्टादशाधिक-द्विसहस्त्रतमे वित्तीयवर्षे त्रयोदश-दशमलव-शून्यादपचीय त्रयोविंशत्यधिक-द्विसहस्त्रतमे वित्तीयवर्षे नव-दशमलव-द्विप्रतिशतं समभवत्। भारतेन पाकिस्तानस्य वर्तमान-शासन-प्रणालीमालक्ष्य आपत्तिः प्रकटीकृता।

# प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य षष्ठे दिनाङ्के जम्मू-कश्मीरस्य यात्रां करिष्यति



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य षष्ठे दिनाङ्के जम्मू-कश्मीरस्य यात्रां करिष्यति। अत्रावसरे सः षड्चत्त्वारिंशत्सहस्त्रकोटि-रुप्यतोप्यधिकाः विकास-परियोजनाः राष्ट्राय समर्पयिष्यति। क्षेत्रे सम्पर्क-समेधनार्थं प्रधानमन्त्री चेनाब-रेलसेतोः अञ्जी-सेतोश्च उद्घाटनं विधास्यति। अवसरेऽस्मिन् प्रधानमन्त्री वन्दे-भारत-रेलयानेभ्यः अपि हरितपताकां प्रदर्शयिष्यति।

# येन प्रकारेण राहुलगान्धिना सशस्त्रबलानां सफलतायाः तुलना आत्मसमर्पणेन सह कृता तेन तेषां शौर्यस्य बलिदानस्य च स्पष्टापमानं प्रत्यक्षीभवति - सुधांशुत्रिवेदी



हिमसंस्कृतवार्ताः - भाजपादलेन सिन्दूराभियानस्य कथितालोचनायै कांग्रेसदलस्य वरिष्ठनेतुः राहुलगान्धिनः उपरि लक्ष्यं साधितम् । नवदिल्ल्यां वार्ताहरान् सम्बोधयन् भाजपाप्रवक्ता सुधांशुत्रिवेदी इत्येषः प्रोक्तवान् यत् येन प्रकारेण राहुलगान्धिना सशस्त्रबलानां सफलतायाः तुलना आत्मसमर्पणेन सह कृता तेन तेषां शौर्यस्य बलिदानस्य च स्पष्टापमानं प्रत्यक्षीभवति। तेन कांग्रेसदलस्योपरि प्रश्नोत्थापयता कथितं यत् षड्विंशतिः/एकादशेति मुम्बई-आक्रमणानन्तरं यूपीए-सर्वकारेण कथितमासीत् यत् पाकिस्तानेन सह समग्रवार्ता आतङ्कवादी-गतिविधिभिः नैव प्रभावितो भविष्यति।

# सर्वकारीचिकित्सालयेषु पंजीकरणं कर्तुं रोगिभ्यः १० रुप्यकाणि स्वीकृतानि भविष्यन्ति अधिसूचना निर्गता




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सर्वकारीयचिकित्सालयेषु पञ्जीकरणं कर्तुं रोगिभ्यः १० रुप्यकाणां परामर्शशुल्कं गृह्यते। सर्वकारस्य मते एषः निर्णयः रोगी कल्याणसमित्याः स्वच्छता, स्वास्थ्यं, आधारभूतसंरचनानाम्, उपकरणानां परिपालनं च इत्यादीनां सेवानां सुदृढीकरणाय, परिष्काराय च कृतः। अस्मिन् विषये सर्वकारेण अधिसूचना निर्गता। अधिसूचनानुसारं रोगीकल्याणसमितिः इदानीम् आवश्यकतायाः आधारेण उपयोक्तृशुल्कं ग्रहीतुम् अधिकृतः अस्ति। एतदतिरिक्तं चिकित्सालये पञ्जीकरणसमये सर्वेभ्यः रोगिभ्यः दशरुप्यकाणां परामर्शशुल्कं ग्रहीतुं निर्णयः कृतः। पूर्वं विहितस्य नामधेयेन कोऽपि शुल्कः न गृहीतः आसीत्। परन्तु अधुना शुल्कं ग्रहीतुं पूर्वं महार्घतया पीडिताः जनसमूहः आघातं प्राप्तवान्।

### १४ वर्गेभ्यः निःशुल्कं निदानपरीक्षणं, एक्स- रे- सुविधाः च नैव भविष्यति

एतेन सह चिकित्सालयेषु क्रियमाणानि १३३ भिन्नानि परीक्षणानि अपि अधुना निःशुल्कं न भविष्यन्ति। राज्यस्य सर्वेषु सर्वकारीय-स्वास्थ्यसंस्थासु २६ मे दिनाङ्के १४ वर्गेभ्यः निःशुल्कनिदानपरीक्षणस्य, एक्स-रे-इत्यस्य च सुविधां निवृत्तं कर्तुं सर्वकारेण निर्णयः कृतः। एतेषां वर्गानां निःशुल्कपरीक्षाणं प्रदातुं मई २६ दिनाङ्के सर्वकारेण अधिसूचना कृता आसीत् अधुना निर्णयः निवृत्तः अस्ति। एतेषु वर्गेषु गम्भीररोगेण पीडिताः कैंसर- गुर्दा- रोगिणः, गर्भिणी, ६० वर्षाणाम् उपरि वृद्धाः, क्षयरोगरोगिणः, दिव्याङ्गरोगिणः, मानसिकरोगिणः, बन्दिनः, एनआरएचएम- लाभार्थिनः, निःशुल्क- औषध-योजनायाः अन्तर्गत- आच्छादिताः रोगिणः, आपदापीडिताः, एच. आई. वी. सकारात्मकाः, बालसुधारगृहस्य बालाः वृद्धाश्रमे अनाथाश्रमे च निवसतः सम्मिलिताः आसन्।

# Martyr Manish Thakur: वीरः मनीष ठाकुरः पंचतत्त्वे लीनः, सैन्यसम्मानपूर्वक अन्त्येष्टिः सम्पन्ना



हिमसंस्कृतवार्ताः- नाहन सिरमौर-जनपदस्य नाहन-उपमण्डलस्थितं बड़ाबनग्रामं वर्षस्य काननं च बुधवासरे “भारत माता की जय” इति घोषैः, “मनीष ठाकुर अमर रहें” इति जयघोषैश्च निनादितम्। यदा प्रायः मध्याह्ने द्वितीये प्रहरं वीरस्य तिरङ्गेण आच्छादिता पार्थिवदेह ग्रामं प्राप्तवती, तदा सर्वेषां नेत्रयोः अश्रुपातः अपि बभूव, किन्तु सर्वे जनाः तस्य वीरबलिदानेन गर्विताः अपि आसीन्। डोगरा-रेजिमेण्ट इत्यस्मिन् नियुक्तः बड़ाबन- ग्रामनिवासी लांस-नायक मनीष ठाकुरः रविवासरे उत्तर-सिक्किम प्रदेशे भूस्खलनदुर्घटनायां वीरगतिं प्राप्तवान्। तस्य बलिदानस्य अनन्तरं परिवारसहितं ग्रामस्य शतशः जनाः तं प्रतीक्षां कुर्वन्तः आसन्। ग्रामात् षट्किलोमीटरदूरं शम्भूवालानामकस्थले शतशः युवकाः एकत्रिताः अभवन्, ते च तिरङ्गध्वजैः युक्तान् द्विचक्रयान् समारुह्य सम्मानपूर्वकं तं गृहम् आनयन्। तस्य दर्शनार्थं सर्वे पारिवारिकाः जनाः उमटन्तः आसन्। मातरः किरणबाला, पितरौ जोगेन्द्रसिंहः, भार्या तनु च तस्य पार्थिवदेहेन सह विलपन्त्यः आसन्। तस्मिन् काले “मनीष ठाकुर अमर रहें” इति घोषैः सह शोकाकुलाः जनसमूहः तिष्ठन्। गृहे सर्वे विधिना कृत्ये समाप्ते, लांस्-नायक् मनीष ठाकुरस्य अन्त्ययात्रा आरब्धा। तस्य भार्या तनु रक्तवस्त्राणि च चूडायुक्तानि धारयित्वा अश्रुपूरितनेत्रा पतिं अपश्यत्। सा सशब्दं क्रोशन्ती “मनीष ठाकुर अमर रहें” इति घोषं कृत्वा तं नीरवदृष्ट्या पश्यन्ती स्थितवती। तिरङ्गयात्रया सह तं सम्मानपूर्वकं कटासनमन्दिरं प्रति जलमूसा-नद्यां स्थितं स्वर्गधामं नीतम्। तत्र सैन्य-पुलिस-द्वारा सम्मानपूर्वकं तस्य अन्त्येष्टिः सम्पन्ना। सेनायाः पुलिसच दलैः तं गार्ड-ऑफ-ऑनर इति अपि दत्तम्। ततः पितरौ जोगेन्द्रसिंहः भ्राता धीरजठाकुरश्च वीरं लांस्-नायक् मनीषं मुखाग्निं दत्वा सश्रद्धं अभिवादनं कृत्वा अश्रुपूर्णनेत्राभ्यां विदायां दत्तवन्तौ। स्वर्गधामे सांसदः सुरेश कश्यपः, पूर्वमन्त्री च विधायकः पांवटासाहिब सुखरामचौधरी, भाजपा-प्रदेशाध्यक्षः डॉ. राजीव बिंदलः, पूर्वविधायकः बलदेवतोमरः, सैन्य-अधिकारीणः, एडीएम एलआर वर्मा, एसपी एनएस नेगी, एसडीएम नाहन राजीव सांख्यान, डीएसपी रमाकान्त ठाकुर, सैनिक-कल्याणबोर्डस्य उपनिदेशकः मेजर दीपक धवनः इत्यादयः अपि पुष्पचक्राणि अर्पयन्।

# हिमाचले सेबस्य ऋतोः सज्जता, मन्त्रीसभा आहूता, जूनमासस्य अन्ते विपण्याम् आगच्छन्ति सेबफलानि



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशः नूतनसेबस्य ऋतोः कृते सज्जः अस्ति। उद्यानमन्त्री जगतसिंहनेगी इत्यनेन सेबस्य ऋतोः सज्जतायाः विषये १२ जून दिनाङ्के राज्यसचिवालये शिमलायां महत्त्वपूर्णसभा आहूता। अस्यां सर्वेषां हितधारकाणाम् आह्वानं कृतम्। तस्मिन् उद्यानपालकाः, मध्यस्थता कर्तारः, ट्रक-सञ्चालकाः, कार्टन-विक्रेतारः इत्यादयः सर्वेषां सम्बद्धानां वर्गानां प्रतिनिधिः भागं ग्रहीष्यन्ति। हिमाचलप्रदेशे जूनमासस्य अन्ते शीघ्रं वर्धमानजातीयानां सेबं निम्नक्षेत्रेभ्यः विपणीषु आगन्तुम् आरभते, परन्तु आधिकारिकसेबस्य ऋतुः १५ जुलाईतः परम् आरभ्यते।

उद्यानमन्त्री जगतसिंहनेगी बुधवासरे उक्तवान् यत् सर्वेषां हितधारकाणां एषा सभा न्यू आर्म्सडेल भवनस्य सभागारे जूनमासस्य १२ दिनाङ्के भविष्यति। अस्मिन् उद्यानपालकैः मध्यस्थतकर्तृभिः ट्रकसञ्चालकैः, सम्बन्धितसामग्रीविक्रेतृभिः इत्यादिभिः सह संवादः क्रियते तेषां समस्यानां श्रवणं भविष्यति, तेषां परामर्शेषु विचारः च भविष्यति। उद्यानपालकाः स्वोत्पादानाम् उत्तममूल्यानि प्राप्नुयुः, ते समये एव स्ववस्तूनि सम्यक् विपणीं प्रति प्रदातुं समर्थाः भवेयुः। एतस्य चर्चा भविष्यति। सः अवदत् यत् उद्यानपालकानां हितस्य रक्षणाय सर्वकारः प्रतिबद्धः अस्ति।

### हिमाचले पञ्चसहस्र-कोटि-रूप्यकाणां भवति सेब-उद्यानस्य व्यवसायः

हिमाचलप्रदेशे सेब-उद्यानस्य वार्षिकं व्यवसायः पञ्चसहस्रकोटिरूप्यकाणां भवति। परन्तु अस्मिन् समये प्रतिकूलवायुकारणात् शिमलामण्डलस्य उच्चोच्चक्षेत्रेषु सस्यं उत्तमं नास्ति, मण्डलस्य निम्नक्षेत्रेषु तु सस्यं सुष्ठु अस्ति। परन्तु कुल्लु-मण्डी-मण्डलेषु सस्यं सुष्ठु इति कथ्यते। परन्तु अनेकेषु स्थानेषु अशमपातेन, चक्रवातेन च अस्य क्षतिः अभवत्।

# HP Education Department: हिमाचलप्रदेशस्य विद्यालयेषु महाविद्यालयेषु च 5 जूनतः शिक्षकाणां स्थानान्तरणे प्रतिबन्धः




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य विद्यालयेषु महाविद्यालयेषु च शिक्षकाणां स्थानान्तरणं जूनमासस्य ५ दिनाङ्कात् प्रतिबन्धितम् अस्ति। शैक्षिकसंस्थासु शिक्षणवातावरणं निर्वाहयितुम् अधुना २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कस्य अनन्तरं एव शिक्षकाणां स्थानान्तरणं भविष्यति। सरकारेण द्वितीयवर्षं यावत् शैक्षणिकसत्रस्य मध्ये स्थानान्तरणं न कर्त्तव्यमिति निर्णयः कृतः। बुधवासरे शिक्षासचिवः राकेशकंवरः स्थानान्तरणनिषेधं कृत्वा अधिसूचना प्रसारितवान्। गतवर्षे सर्वकारेण निर्णयः कृतः आसीत् यत् आवर्षं शिक्षकानां स्थानान्तरणं न भविष्यति। अस्मिन् प्रकरणे अधुना जूनमासस्य ५ दिनाङ्कात् स्थानान्तरणस्य पूर्णप्रतिबन्धः भविष्यति। विभागेन स्थानान्तरणार्थं प्रायः १८ सहस्राणि आवेदनानि प्राप्तानि आसन्। एतानि आवेदनपत्राणि मन्त्रिणां विधायकानां च डीओ-टिप्पण्या सह विद्यालयशिक्षानिदेशालयं प्राप्तानि। प्रायः अष्टसहस्राणां स्थानान्तरणस्य आदेशाः निर्गताः सन्ति। अवशिष्टानाम् आवेदनानां विषये विचारः न भविष्यति।

# २०२७ तमे वर्षे द्वयोः चरणयोः जनगणना भविष्यति, हिमाचलसहितेषु ४ राज्येषु आगामिवर्षात् कर्तुं योजना

## जनगणना

हिमसंस्कृतवार्ताः- नवदेहली।केन्द्रसर्वकारेण राष्ट्रियजनगणना २०२७ द्वयोः चरणयोः करणस्य घोषणा कृता अस्ति, तदर्थं अधिसूचना च जूनमासस्य १६ दिनाङ्के निर्गतं भविष्यति। लद्दाखः, जम्मूकश्मीरः, हिमाचलप्रदेशः, उत्तराखण्डः चेत्येतेषां हिमयुक्तेषु क्षेत्रेषु आगामिवर्षस्य सितम्बरमासे एव जनगणनाकार्यम् आरब्धुं शक्यते। शेषेषु राज्येषु २०२७ तमस्य वर्षस्य फरवरीमासे एतत् कार्यम् आरभ्यते इति सम्भावना अस्ति। सर्वकारस्य निर्णयानुसारम् अस्मिन् समये जनगणनायां जातिगणना अपि अन्तर्भवति। अन्तिमगणना २०११ तमे वर्षे कृता तस्मिन् समये अपि एतत् कार्यं द्वयोः चरणयोः सम्पन्नम्। गृहमन्त्रालयेन बुधवासरे विज्ञप्तौ उक्तं यत् जनगणना- २०२७ इत्यस्य सन्दर्भतिथिः "१ मार्च २०२७ दिनाङ्के ००:०० घण्टाः" इति स्थापिता भविष्यति। लद्दाखस्य केन्द्रीय- क्षेत्रस्य, जम्मूकश्मीरस्य केन्द्रीय- क्षेत्रस्य, हिमाचलप्रदेशस्य, उत्तराखण्डस्य च राज्यस्य हिमबद्धक्षेत्राणां कृते सन्दर्भतिथिः "अक्टोबर, २०२६ तमस्य वर्षस्य प्रथमदिने ००:०० घण्टाः" इति स्थापिता अस्ति। विज्ञप्तिपत्रे उक्तं यत् जनगणना-अधिनियमस्य धारा ३ प्रावधानेन उपर्युक्तसन्दर्भतिथिभिः सह जनगणनायाः अभिप्रायस्य अधिसूचना १६ जूनदिनाङ्के आधिकारिकराजपत्रे प्रकाशिता भविष्यति। कोविड-कारणात् सर्वकारः २०२१ जनगणनां कर्तुं न शक्तवान्। जनगणना- २०२१ इत्यस्य प्रथमचरणस्य सर्वा सज्जताः सम्पन्नाः अभवन्। केषुचित् राज्येषु/ संघप्रदेशेषु १ अप्रैल २०२० तः क्षेत्रकार्यं आरभ्यत इति आसीत् महामारीप्रकोपात् जनगणनाकार्यं स्थगितव्यम् आसीत्।

# अस्मिन् दिने 'द राजा साहब' चलच्चित्रं प्रदर्शितं भविष्यति, पुटकस्य प्रसारणतिथ्याः विषये अपि महती वार्ता आगता




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई**
दक्षिणस्य नायकस्य प्रभासस्य भयानकहास्यचलच्चित्रस्य 'द राजा साहब' इत्यस्य विषये महती वार्ता आगता। 'द राजा साहब' प्रभासस्य प्रथमं भयानकहास्यचलच्चित्रम् अस्ति। प्रशंसकाः बहुकालात् अस्य चलच्चित्रस्य प्रतीक्षां कुर्वन्ति। पूर्वम् एतत् चलच्चित्रम् अप्रैलमासे प्रदर्शितं भविष्यति स्म। परन्तु चित्रोतलनं न सम्पन्नस्य कारणात् निर्मातारः विमोचनस्य तिथिं स्थगितवन्तः। अधुना निर्मातारः नूतनं विमोचनस्य तिथिं घोषितवन्तः। चलच्चित्रस्य प्रदर्शनदिनाङ्केन सह निर्मातृभिः विज्ञापन पुटकस्य प्रदर्शनस्य तिथिः अपि घोषिता अस्ति। अस्मिन् मासे विज्ञापन पुटकं प्रदर्शितं भविष्यति। अस्मिन् वर्षे अन्ते चलच्चित्रं प्रदर्शितं भवति इति कारणतः प्रशंसकाः किञ्चित् अधिकं प्रतीक्षां कर्तुं प्रवृत्ताः भविष्यन्ति। अद्य निर्मातारः 'द राजा साहब' इत्यस्य प्रभासस्य छायाचित्रं सामाजिकमाध्यमेषु प्रसारितं कृतवन्तः। छायाचित्रं प्रसार्य निर्मातारः सूचितवन्तः यत् विज्ञापन पुटकं जूनमासस्य १६ दिनाङ्के प्रदर्शितः भविष्यति। चलच्चित्रमिदं दिसम्बरमासस्य ५ दिनाङ्के प्रेक्षागृहेषु प्रदर्शितं भविष्यति।

# अथ शिवध्यानम्



।शङ्गवे पशुपतये पशुपतये
शङ्गवेशङ्गवे पशुपतये।
।शङ्गवऽइतिशम् गवे।
।पशुपतयऽउग्ग्रायोग्ग्राय
पशुपतयेपशुपतय उग्ग्राय।
।पशुपतयऽइति पशु पतये।
।उग्ग्रायभीमाय भीमायोग्ग्रायोग्ग्राय
भीमाय।।भीमायाग्ग्रेवधायाग्ग्रे
वधाय भीमाय भीमायाग्ग्रे वधाय।
।अग्ग्रेवधाय दूरेवधाय
दूरेवधायाग्ग्रेवधायाग्ग्रे वधाय दूरेवधाय।
।अग्ग्रेवधायेत्यग्ग्रे व्वधाय।
।दूरेवधाय हन्त्रेहन्त्रे दूरेवधायदूरेवधाय हन्त्रे।
।दूरेवधायेति दूरे व्वधाय।
।हन्त्रे हनीयसेहनीयसे हन्त्रेहन्त्रे हनीयसे।
।हनीयसे व्वृक्षेब्भ्योव्वृक्षेब्भ्यो हनीयसेहनीयसे वृक्षेब्भ्यः।
।वृक्षेब्भ्यो हरिकेशेब्भ्यो हरिकेशेब्भ्यो
वृक्षेब्भ्यो वृक्षेब्भ्यो हरिकेशेब्भ्यः।।हरिकेशेब्भ्यस्ताराय ताराय
हरिकेशेब्भ्यो हरिकेशेब्भ्यस्ताराय।
।हरिकेशेब्भ्यऽइति हरि केशेब्भ्यः।।तारायेति ताराय।।

**वसिष्ठः व्यासः**

## केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे संस्कृतभारती-ईशान्यक्षेत्रस्य क्षेत्रीयप्रशिक्षणवर्गः




**हिमसंस्कृतवार्ता, अगरतला, त्रिपुरा।** केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरः एवञ्च संस्कृतभारती-त्रिपुराप्रान्तस्य संयुक्ततत्त्वावधाने त्रिपुराराज्यस्थिते एकलव्यपरिसरे 2025 तमस्य वर्षस्य जुनमासस्य द्वितीयदिनाङ्कतः द्वादशदिवसीय ईशान्यक्षेत्रीयप्रशिक्षणवर्गः प्रातः दशवादनतः प्रारब्धः जातः। वर्गस्यास्य उद्घाटनसत्रे मुख्यातिथिरूपेण उपस्थितः आसीत् मान्या रत्नारायमहोदया। सा महोदया त्रिपुरासर्वकारस्य Institute of Advanced Studies In Education इत्यस्य महाविद्यालयस्य अध्यक्षा वर्तते। अस्मिन् वर्गे विशिष्टातिथिरूपेण विराजमानः आसीत् संस्कृतभारत्याः ईशान्यक्षेत्रस्य संघटनमन्त्री श्रीमोहनकन्नणमहोदयः। अस्मिन् कार्यक्रमे वर्गाधिकारीरूपेण आसनमलंकृतवान् एकलव्यपरिसरस्य निदेशकः मान्यः प्रो.मखलेशकुमारमहाभागः। परम्परानुगुणं दीपप्रज्वलनेन अस्य कार्यक्रमस्योद्घाटनमारब्धम्। समागतानामतिथिनां सम्माननं कृतं संस्कृतभारती-त्रिपुराप्रान्तस्य संघटनमन्त्रिणा श्रीमता विक्रमविश्वासमहोदयेन। वर्गस्यास्य उद्घाटनसत्रे समेषां कृते धन्यवादज्ञापनं कृतवान् संस्कृतभारती-पश्चिमत्रिपुराजनपदस्य अध्यक्षः श्रीमान् योगेशचन्द्रदेवनाथमहोदयः। आक्षेत्रात् प्रायः पञ्चाशीतिशिक्षार्थिणः एतस्मिन् वर्गे भागम् अगृह्णन् । शिक्षकः तथा प्रबन्धकरूपेण प्रायः पञ्चविंशतिजनाः कार्यं कुर्वन्तः सन्ति। अस्य वर्गस्य समापनं भविष्यति अस्य मासः चतुर्दशदिनाङ्के।

sudha_sathaye@yahoo.com

## इन्द्रः इन्द्रः कः?

इन्द्रः नाम पदं भवति। इन्द्रः देवानां सेनापतिः अस्ति। अमरावती इत्येषा तस्य राजधानी अस्ति। एषा एव नगरी 'स्वर्गः' इति प्रसिद्धा अस्ति। प्रत्येकं मन्वन्तरं एकः इन्द्रः भवति। साम्प्रतं इन्द्रः कः? अस्मिन् वैवस्वतमन्वन्तरे इन्द्रः अस्ति- पुरन्दरः। सः महर्षेः कश्यपस्य अदितेः च पुत्रः अस्ति। पूर्वे इन्द्राः पुरन्दरात् पूर्वं पञ्च इन्द्राः स्वर्गे अधिराज्यं कृतवन्तः।

तेषां नामानि- यज्ञः, विपश्चित्, शीबिः, विधुः, मनोजवः च। अनागते इन्द्राः पुरन्दरानन्तरं ये इन्द्राः भविष्यन्ति, ते बलिः, अद्भुतः, शान्तिः, विशः, ऋतुधामन्, देवस्पतिः, सुचिः च।

इन्द्रस्य विषये संक्षेपेण-

सम्प्रति इन्द्रः अस्ति- पुरन्दरः।

तस्य मुख्यपत्नी- शची (इन्द्राणी)।

शच्या व्यतिरिक्तं द्वात्रिंशत् भार्याः अपि तस्य।

इन्द्रस्य नगरी- अमरावती।

तस्य उद्यानम्- नन्दनवनम्, यत्र कल्पवृक्षः अस्ति।

तस्य सभा- सुधर्मा सभा।

### इन्द्रस्य विशेषताः

इन्द्रः न कदापि रोगेण बाध्यते, न च वृद्धः भवति। सः सदा यौवनयुक्तः, सौन्दर्यसम्पन्नः च भवति। सः देवानां सेनापतिः। तस्य आज्ञां सर्वे देवाः स्वीकुर्वन्ति। सः महाबलवान्, ऐश्वर्ययुक्तः, वैभवशाली च अस्ति।

**तस्य प्रभावः-** कैलासं, ब्रह्मलोकं, वैकुण्ठं च अपि व्याप्नोति। सः त्रिषु लोकेषु अनन्तानि सुखानि अनुभवन् राज्यं करोति।

तस्य गुरुः बृहस्पतिः, यः राजकार्ये मार्गदर्शनं करोति। इन्द्रस्य चारित्र्यदोषः तस्य अहङ्कारः, कामभावनाः, असुरेभ्यः अन्यायः च। एतेषां कारणेन मनुष्यैः तस्य उपासना न्यूनता प्राप्ता अस्ति।

**इन्द्रस्य आयुः-**अस्मिन् ब्रह्माण्डे चतुर्दश मन्वन्तराणि सन्ति। प्रत्येकं मन्वन्तरे एकः इन्द्रः भवति। यथा राष्ट्रे एकः एव प्रधानमन्त्री भवति, तथा। वैवस्वतमन्वन्तरस्य इन्द्रः- पुरन्दरः। तस्य आयुः चतुर्लक्षत्रयं च विंशतिः सहस्राणि वर्षाणि (४,३२०,००० वर्षाणि)।

**बली नाम इन्द्रः-** वैवस्वतमन्वन्तरात् परं यः अर्कसावर्णिमन्वन्तरः भविष्यति, तत्र इन्द्रः भविष्यति बलिः। एषः बलिः भगवान्नारायणस्य भक्तः प्रह्लादस्य पौत्रः अस्ति।

**निष्कर्षः-**स्वर्गः अनादिकालात् अस्ति।कति इन्द्रैः स्वर्गे राज्यं कृतम्। इदं कथयितुं कठिनम्। इन्द्रः अमरावत्यां नानाविधानि सुखानि उपभुङ्क्ते। तथापि, एकस्मिन् दिवसे तस्य पदत्यागः भवति।

## विश्वपर्यावरणदिवसः पर्यावरणसंरक्षणम्

# अस्माकम् उत्तरदायित्वम्

पर्यावरणस्य रक्षणाय, संरक्षणाय च ५ जून दिनाङ्के सम्पूर्णे विश्वे अस्य उत्सवः आचर्यते । १९७२ तमे वर्षे संयुक्तराष्ट्रसङ्घः पर्यावरणप्रति वैश्विकराजनैतिकसामाजिकजागरूकतां आनेतुं अस्य दिवसस्य घोषणां कृतवान् । संयुक्तराष्ट्रसङ्घस्य महासभायाः ५ जूनतः १६ जूनपर्यन्तं आयोजिते विश्वपर्यावरणसम्मेलने चर्चायाः अनन्तरं अस्य आरम्भः अभवत् । अस्य समर्थनं बहुभिः गैरसरकारीसंस्थाभिः, व्यवसायैः, सरकारीसंस्थाभिः च भवति तथा च पर्यावरणस्य समर्थनं कुर्वन् संयुक्तराष्ट्रसङ्घस्य प्राथमिकप्रसारदिवसस्य प्रतिनिधित्वं करोति प्रथमः विश्वपर्यावरणदिवसः १९७३ तमे वर्षे जूनमासस्य ५ दिनाङ्के आचरितः । ततः परं समुद्रप्रदूषणं, अतिजनसंख्या, वैश्विकतापः, स्थायिविकासः, वन्यजीव-अपराधः इत्यादिषु पर्यावरणविषयेषु जागरूकतां जनयितुं मञ्चः अस्ति । विश्वपर्यावरणदिवसः जनप्रसारणस्य वैश्विकमञ्चः अस्ति, यत्र प्रतिवर्षं १४३ तः अधिकेभ्यः देशेभ्यः सहभागिता भवति । प्रतिवर्षं अस्मिन् कार्यक्रमे व्यवसायानां, गैरसरकारीसंस्थानां, समुदायानाम्, सर्वकाराणां, प्रसिद्धानां च कृते पर्यावरणकारणानां वकालतुं विषयः, मञ्चः च प्रदत्तः अस्ति ।

सम्प्रति पर्यावरणं पूर्णम् असन्तुलितं जातमस्ति । अस्य संरक्षणम् आवश्यकमस्ति । परं किम् एकवारं यदि पर्यावरणं सुरक्षितं भविष्यति तर्हि सर्वाषां पर्यावरण-समस्यानां समाधानं भविष्यति इति चेन्न । भवन्तः पर्यावरणसमस्येति प्रकरणे पठितवन्तः यत् सर्वप्रमुखा समस्या अस्ति सामाजिकी,नैतिकी, प्राकृतिकी, जनसंख्या च । समस्याः एताः तदैव समधिगताः भविष्यन्ति यदा निरन्तर-प्रयासः भविष्यति । अतः आवश्यकं भवति यत् पर्यावरणस्य शिक्षा सर्वेभ्यः सामाजिकेभ्यः बाल- युवा-वृद्धेभ्यश्च दातव्या । अस्याः शिक्षायाः प्रसारः विविधेषु अभिकरणेषु एव आधारितः अस्ति । अतः अत्र तेषामभिकारणानां विषये चिन्तितं वर्तते ।

**बालकानां दायित्वम्**-गृहस्य भूमिका – बालकानां प्राम्भिकी शिक्षा गृहेषु एव भवति । अपि च पितरौ एव तान् पाठयतः । अर्थात् एवमपि कथयितुं शक्यते यत् गृहे निवस्यमानाः सर्वे ज्येष्ठाः बालकानामध्यापकाः भवन्ति । ज्येष्ठानां व्यवहारः एव तेभ्यः पाठ्यक्रमः भवति । आदर्शव्यवहार-संहितायाः निर्माणं गृहे एव भवति । उदाहरणं तु गृहेषु द्रष्टुं शक्यते यत् सभ्य-शिक्षितपरिवाराणां बालकाः सदाचरणं कुर्वन्ति तथा निम्नपरिवाराणां बालकाः एतन्न कुर्वन्ति । गृहे यदि ज्येष्ठाः पर्यावरणं न प्रदूषयन्ति तर्हि तेषां कनिष्ठाः अपि तथा न कुर्वन्ति । अर्थात् यदि गृहे ज्येष्ठाः पर्यावरणप्रदूषणनियन्त्रणाय एव सर्वाणि कार्याणि कुर्वन्ति, यथा – संसाधनानां समुचितः उपयोगः, जल –भू-वायु-ध्वनीनां वा प्रदूषणनियन्त्रणं तर्हि बालकः तथा एव करिष्यन्ति । अतः पर्यावरण- संरक्षणं तदैव सुनिश्चितं भविष्यति यदा गृहे स्थिताः जनाः पर्यावरण- संरक्षणे तत्पराः भविष्यन्ति, प्रारम्भतः एव वालकेभ्यः पर्यावरणस्य, प्रदूषणस्य, नियन्त्रणस्य ज्ञानं प्रदास्यन्ति । अतः गृहं भवति मुख्यमभिकरणं येनपर्यावरणं संरक्षितं भविष्यति ।

**विद्यालयानां भूमिका**-महाविद्यालयानां भूमिका –गृहात्परं बालकेभ्यः पर्यावरण ज्ञानस्य कौशलस्य, मूल्यस्य, अभिवृत्तेश्च शिक्षा विद्यालयेषु महाविद्यालयेषु एव प्रदीयते अत्राध्यापकाः छात्रेभ्यः सर्वविध-ज्ञानं प्रदाय पर्यावरणं प्रति रुच्युत्पादनं कुर्वन्ति । परमेतदर्थमावश्यकमस्ति यत् ते अध्यापकाः पर्यावरणस्य, प्रदूषणस्य, प्रदूषणनियन्त्रणस्य च विषये पण्डिताः स्युः । अस्याः शिक्षायाः उपयोगः ते सर्वासु उपलब्धेषु परिस्थितिषु कुर्युः । प्रत्यक्षाप्रत्यक्षरुपेण च इदं ज्ञानं प्रयच्छेयुः । यदि अध्यापकाः कुशलिनः सन्ति, योग्याः सन्ति, प्रबुद्धाः सन्ति, पर्यावरणवेत्तारः सन्ति, प्रबोधकाः सन्ति तर्हि पर्यावरण संरक्षणे विद्यालयस्य भूमिका वर्धिता भविष्यति ।

**सामाजिकसंस्थानां भूमिका** – सर्वेषु स्तरेषु जनाः गृहात् विद्यालयात् वा परं स्वकीयं समयं समाजे पारस्परिकसम्बन्धनिर्माणाय ददति, भवतु ते छात्राः ग्रामिणश्च । यथा ते क्रीडाक्षेत्रं, मनोरञ्जनस्थलं, सभास्थलं, मन्दिरं, धर्मस्थलम् आपणमित्यादीनि स्थलानि तु गच्छन्ति एव । तत्र गत्वा विभिन्नेषु सामाजिककार्यक्रमेषु भागमपि गृह्णन्ति । तत्र काश्चनः पर्यावरणसम्बन्धिताः परिस्थितयः अपि आगच्छन्ति एव । तासां परिस्थितिनां समाधानं ते स्व-विवेकेन वयस्कानां सहयोगेन च कुर्वन्ति । फलतः अनया प्रक्रियया ते पर्यावरणस्य, पर्यावरण समस्यानां, तासां समाधानानां च ज्ञानमर्जयन्ति। अपि च प्राप्त पर्यावरणविषयकज्ञानस्य कथमुपयोगः भवति इति प्रायोगिकं ज्ञानं ते प्राप्नुवन्ति । यथा- जलानां समुचितोमुपयोगः, ग्राम्यस्वच्छता इत्यादयः ।

**अन्येभ्यः**-सञ्चारमाध्यमस्य भूमिका –सर्वविधकार्यक्रमाणां प्रचारकः भवति सञ्चारमाध्यमः । अनेन अशिक्षिताः, शिक्षिताः, छात्राः कर्मचारिणः, अधिकारिणश्च पर्यावरणसम्बधितं ज्ञानं प्राप्नुवन्ति । सञ्चारस्य साधनानि भवन्ति, समाचारपत्रं, पत्र –पत्रिकाः, आकाशवाणी, दूरदर्शनं, वार्ता, भाषणानि, चलचित्रं च । सेवाकालिकस्य प्रशिक्षणस्य कृते संचारसाधनानि महत्वपूर्णानि भवन्ति । शोधसंस्थानां भूमिका-पर्यावरणस्य क्षेत्रे उपलब्धानामेकत्रितानां वा सामग्रीणां जनेभ्यः वितरणेमवशोधसंस्थायाः दायित्वं न भवति अपितु स्वदेशस्य स्थित्यनुसारेण पर्यावरणस्य विशिष्टज्ञानानामन्वेषणं, समस्यामधीत्य समाधानान्वेषणं तथा तस्य प्रसारणं चास्याः संस्थायाः दायित्वं भवति । अतः राष्ट्रियस्तरे, प्रान्तीयस्तरे, क्षेत्रीयस्तरे च शोधस्यावश्यकता वर्तते । सोधसंस्थायाः दायित्वं भवति यत् सा क्षेत्रेऽस्मिन् शोधकार्यं कारयेत् ।

**विभिन्नानां विशिष्टसंस्थानां भूमिका-** समग्रे विश्वे काश्चन एवं विधाः संस्थाः सन्ति याः पर्यावरणं शिक्षां च प्राणैक शरीरद्वयं मत्वा कार्यं कुर्वन्ति । इमाः पर्यावरणस्य विविधाङ्गानां ज्ञानप्रदानस्य नूतनसूचना- प्रदानस्य च कार्यं कुर्वन्ति । आभिः संस्थाभिः जनाः विविधपर्यावरण-समस्यानां समाधानानाञ्च ज्ञानं प्राप्नुवन्ति ।